आ न॒ऽइडा॑भिर्वि॒दथे॑ सुश॒स्ति वि॒श्वान॑रः सवि॒ता दे॒वऽए॑तु ।
अपि॒ यथा॑ युवानो॒ मत्स॑था नो॒ विश्वं॒ जग॑दभिपि॒त्वे म॑नी॒षा ॥ ३४ ॥

यद॒द्य कच्च॑ वृत्रहन्नु॒दगा॑ऽअ॒भि सू॑र्य । सर्वं॒ तदि॑न्द्र॒ ते वशे॑ ॥ ३५ ॥

त॒रणि॑र्वि॒श्वद॑र्शतो ज्योति॒ष्कृद॑सि सूर्य । विश्व॒मा भा॑सि रोच॒नम् ॥ ३६ ॥

तत्सूर्य॑स्य दे॒व॒त्वं तन्म॑हि॒त्वं म॒ध्या कर्तो॒र्वित॑त॒ꣳ सं ज॑भार ।
य॒देदयु॑क्त ह॒रितः॑ स॒धस्था॒दाद्रात्री॒ वास॑स्तनुते सि॒मस्मै॑ ॥ ३७ ॥

तन्मि॒त्रस्य॒ वरु॑णस्याभि॒चक्षे॒ सूर्यो॑ रू॒पं कृ॑णुते॒ द्योरु॒पस्थे॑ ।
अ॒न॒न्तम॒न्यद्रु॒शद॑स्य॒ पाजः॑ कृ॒ष्णम॒न्यद्ध॒रितः॒ सं भ॑रन्ति ॥ ३८ ॥

बण्म॒हाँ२ऽअ॑सि सूर्य॒ बडा॑दित्य म॒हाँ२ऽअ॑सि ।
म॒हस्ते॑ स॒तो म॑हि॒मा प॑नस्यते॒ऽद्धा दे॑व म॒हाँ२ऽअ॑सि ॥ ३९ ॥

बट् सू॑र्य॒ श्रव॑सा म॒हाँ२ऽअ॑सि स॒त्रा दे॑व म॒हाँ२ऽअ॑सि ।
म॒ह्ना दे॒वाना॑मसु॒र्यः॑ पु॒रोहि॑तो वि॒भु ज्योति॒रदा॑भ्यम् ॥ ४० ॥

श्राय॑न्तऽइव॒ सूर्यं॒ विश्वेदिन्द्र॑स्य भक्षत ।
वसू॑नि जा॒ते जन॑मान॒ऽओज॑सा॒ प्रति॒ भागं॒ न दी॑धिम ॥ ४१ ॥

अ॒द्या दे॑वा॒ऽउदि॑ता॒ सूर्य॑स्य॒ निरꣳह॑सः पिपृ॒ता निर॑व॒द्यात् ।
तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑तिः॒ सिन्धुः॑ पृथि॒वी ऽउ॒त द्यौः ॥ ४२ ॥

आ कृ॒ष्णेन॒ रज॑सा॒ वर्त॑मानो निवे॒शय॑न्न॒मृतं॒ मर्त्यं॑ च ।
हि॒र॒ण्यये॑न सवि॒ता रथे॒ना दे॒वो या॑ति॒ भुव॑नानि॒ पश्य॑न् ॥ ४३ ॥

प्र वा॑वृजे सुप्र॒या ब॒र्हिरे॑षामा वि॒श्पती॑व॒ बीरि॑टऽइयाते ।
वि॒शाम॒क्तोरु॒षसः॑ पू॒र्वहू॑तौ वा॒युः पू॒षा स्व॒स्तये॑ नि॒युत्वा॑न् ॥ ४४ ॥

इ॒न्द्र॒वा॒यू बृह॒स्पतिं॑ मि॒त्राग्निं पू॒षणं॒ भग॑म् । आ॒दि॒त्यान्मारु॑तं ग॒णम् ॥ ४५ ॥
वरु॑णः प्रावि॒ता भु॑वन्मि॒त्रो विश्वा॑भिरू॒तिभिः॑ । कर॑तां नः सु॒राध॑सः ॥ ४६ ॥

अधि॑ न इन्द्रैषां॒ विष्णो॑ सजा॒त्याना॑म् । इ॒ता मरु॑तो॒ऽअश्वि॑ना ॥ तं प्र॒त्नथा॒यं
वे॒नो ये दे॑वास॒ऽआ न॒ऽइडा॑भि॒र्विश्वे॑भिः सोम्यं मध्वो॒मास॑श्चर्षणीधृतः ॥ ४७ ॥

अग्न ऽइन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो ऽअध ग्राः पूषा भगः सरस्वती जुषन्त ॥ ४८ ॥

इन्द्राग्नी मित्रावरुणादितिꣳ स्वः पृथिवीं द्यां मरुतः पर्वताँ२ऽ अपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शꣳसꣳ सवितारमूतये ॥ ४९ ॥

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शꣳसते स्तुवते धायि पज्र ऽइन्द्रज्येष्ठा ऽअस्माँ२ऽ अवन्तु देवाः ॥ ५० ॥

अर्वाञ्चो ऽअद्या भवता यजत्रा ऽआ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥ ५१ ॥

विश्वे ऽअद्य मरुतो विश्व ऽउती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा ऽअवसा गमन्तु विश्वमस्तु द्रविणं वाजो ऽअस्मे ॥ ५२ ॥

विश्वे देवाः शृणुतेमꣳ हवं मे ये ऽअन्तरिक्षे य ऽउप द्यवि ष्ठ ।
ये ऽअग्निजिह्वा ऽउत वा यजत्रा ऽआसद्यास्मिन्बर्हिषि मादयध्वम् ॥ ५३ ॥

देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वꣳ सुवसि भागमुत्तमम् ।
आदिद्दामानꣳ सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ॥ ५४ ॥

प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारꣳ रथप्राम् ।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥ ५५ ॥

इन्द्रवायू ऽइमे सुता ऽउप प्रयोभिरा गतम् । इन्दवो वामुशन्ति हि ॥ ५६ ॥

मित्रꣳ हुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचीꣳ साधन्ता ॥ ५७ ॥

दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः । आ यातꣳ रुद्रवर्त्तनी ॥ तं प्रत्नथायं वेनः ॥ ५८

विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यꣳ सध्र्यक्कः ।
अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥ ५९ ॥

नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुर ऽएतारमग्नेः ।
एमेनमवृधन्नमृता ऽअमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः ॥ ६० ॥

उग्रा विघनिना मृध ऽइन्द्राग्नी हवामहे । ता नो मृडात ऽईदृशे ॥ ६१ ॥

उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ२ऽ इयक्षते ॥ ६२ ॥

ये त्वाहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये गविष्टौ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमꣳ सगणो मरुद्भिः ॥ ६३ ॥

जनिष्ठाऽ उग्रः सहसे तुराय मन्द्रऽ ओजिष्ठो बहुलाभिमानः।
अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥ ६४ ॥

आ तू नऽ इन्द्र वृत्रहन्नस्माकमर्धमा गहि। महान्महीभिरूतिभिः॥ ६५॥

त्वमिन्द्र प्रतूर्तिष्वभि विश्वाऽ असि स्पृधः।
अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥ ६६ ॥

अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥ ६७ ॥

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः।
आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासत्॥ ६८॥

अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम्।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नोऽ अघशꣳसऽ ईशत ॥ ६९ ॥

प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥ ७० ॥

गावऽ उपावतावतं मही यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया ॥ ७१ ॥

काव्ययोराजानेषु क्रत्वा दक्षस्य दुरोणे। रिशादसा सधस्थऽ आ ॥ ७२॥

दैव्यावध्वर्यू आ गतꣳ रथेन सूर्यत्वचा।
मध्वा यज्ञꣳ समञ्जाथे ॥ तं प्रत्नथायं वेनः ॥ ७३ ॥

तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त्।
रेतोधाऽ आसन्महिमानऽ आसन्त्स्वधाऽ अवस्तात्प्रयतिः परस्तात् ॥ ७४॥

आ रोदसीऽ अपृणदा स्वर्महज्जातं यदेनमपसोऽ अधारयन्।
सोऽ अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ॥ ७५ ॥

उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा । आङ्गूषैराविवासतः ॥ ७६ ॥

उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये । सुमृडीका भवन्तु नः ॥ ७७ ॥

ब्रह्माणि मे मतयः शꣳ सुतासः शुष्मऽइयर्ति प्रभृतो मेऽअद्रिः ।
आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नोऽअच्छ ॥ ७८॥

अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ २ऽ अस्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥७९॥

तदिदास भुवनेषु ज्येष्ठं यतो जज्ञऽउग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥ ८० ॥

इमाऽउ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥ ८१ ॥

यस्यायं विश्वऽआर्यो दासः शेवधिपाऽअरिः ।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सोऽअज्यते रयिः ॥८२॥

अयꣳ सहस्रमृषिभिः सहस्कृतः समुद्रऽइव पप्रथे ।
सत्यः सोऽअस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥८३॥

अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नोऽअघशꣳसऽईशत ॥ ८४ ॥

आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः ।
अन्तः पवित्रऽउपरि श्रीणानोऽयꣳ शुक्रोऽअयामि ते ॥८५॥

इन्द्रवायू सुसन्दृशा सुहवेह हवामहे ।
यथा नः सर्वऽइज्जनोऽनमीवः सङ्गमे सुमनाऽअसत् ॥ ८६ ॥

ऋधगित्था स मर्त्यः शशमे देवतातये ।
यो नूनं मित्रावरुणावभिष्टयऽआचक्रे हव्यदातये ॥ ८७ ॥

आ यातमुप भूषतं मध्वः पिबतमश्विना ।
दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतम् ॥८८॥

प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥८९॥

चन्द्रमा ऽअप्स्वन्तरा सुपर्णो धावते दिवि ।
रयिं पिशङ्गं बहुलं पुरुस्पृहꣳ हरिरेति कनिक्रदत् ॥ ९० ॥

देवं-देवं वोऽवसे देवं-देवमभिष्टये ।
देवं-देवꣳ हुवेम वाजसातये गृणन्तो देव्या धिया ॥ ९१ ॥

दिवि पृष्टो ऽअरोचताग्निर्वैश्वानरो बृहन् ।
क्ष्मया वृधान ऽओजसा चनोहितो ज्योतिषा बाधते तमः ॥९२॥

इन्द्राग्नी ऽअपादियं पूर्वागात्पद्वतीभ्यः ।
हित्वी शिरो जिह्वया वावदच्चरत्त्रिꣳशत्पदा न्यक्रमीत् ॥ ९३ ॥

देवासो हि ष्मा मनवे समन्यवो विश्वे साकꣳ सरातयः ।
ते नो ऽअद्य ते ऽअपरं तुचे तु नो भवन्तु वरिवोविदः ॥९४॥

अपाधमदभिशस्तीरशस्तिहाथेन्द्रो द्युम्न्याभवत् ।
देवास्त ऽइन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण ॥ ९५ ॥

प्र व ऽइन्द्राय बृहते मरुतो ब्रह्मार्चत ।
वृत्रꣳ हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥ ९६ ॥

अस्येदिन्द्रो वावृधे वृष्ण्यꣳ शवो मदे सुतस्य विष्णवि ।
अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा ।
इमा ऽउ त्वा यस्यायमयꣳ सहस्रमूर्ध्व ऽऊ षु णः ॥९७॥

इति त्रयस्त्रिंशोऽध्यायः ।

अथ चतुस्त्रिंशोऽध्यायः ।

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १ ॥

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥ २ ॥

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऽ ऋते किं चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३ ॥

येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥ ४ ॥

यस्मिन्नृचः साम यजूꣳषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिꣳश्चित्तꣳ सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥ ५ ॥

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन ऽ इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥ ६ ॥

पितुं नु स्तोषं महो धर्माणं तविषीम् । यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥ ७ ॥

अन्विदनुमते त्वं मन्यासै शं च नस्कृधि ।
क्रत्वे दक्षाय नो हिनु प्र ण ऽ आयूꣳषि तारिषः ॥ ८ ॥

अनु नोऽद्यानुमतिर्यज्ञं देवेषु मन्यताम् । अग्निश्च हव्यवाहनो भवतं दाशुषे मयः ॥ ९ ॥

सिनीवालि पृथुष्टुके या देवानामसि स्वसा । जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥ १०

पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः । सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥ ११ ॥

त्वमग्ने प्रथमो ऽ अङ्गिरा ऽ ऋषिर्देवो देवानामभवः शिवः सखा ।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः ॥ १२ ॥

त्वं नो ऽ अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्तव व्रते ॥ १३ ॥

उत्तानायामव भरा चिकित्वान्त्सद्यः प्रवीता वृषणं जजान ।
अरुषस्तूपो रुशदस्य पाजऽइडायास्पुत्रो वयुनेऽजनिष्ट ॥ १४ ॥

इडायास्त्वा पदे वयं नाभा पृथिव्याऽअधि। जातवेदो निधीमह्यग्ने हव्याय वोढवे ॥१५॥

प्र मन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे ऽअङ्गिरस्वत् ।
सुवृक्तिभि स्तुवतऽऋग्मियायार्चामार्कं नरे विश्रुताय ॥ १६ ॥

प्र वो महे महि नमो भरध्वमाङ्गूष्यंꣳ शवसानाय साम ।
येना नः पूर्वे पितरः पदज्ञाऽअर्चन्तोऽअङ्गिरसो गाऽअविन्दन् ॥ १७ ॥

इच्छन्ति त्वा सोम्यासः सखायः सुन्वन्ति सोमं दधति प्रयाꣳसि ।
तितिक्षन्तेऽअभिशस्तिं जनानामिन्द्र त्वदा कश्चन हि प्रकेतः ॥१८॥

न ते दूरे परमा चिद्रजाꣳस्या तु प्र याहि हरिवो हरिभ्याम् ।
स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधानेऽअग्नौ ॥१९॥

अषाढं युत्सु पृतनासु पप्रिꣳ स्वर्षामप्सां वृजनस्य गोपाम् ।
भरेषुजाꣳ सुक्षितिꣳ सुश्रवसं जयन्तं त्वामनु मदेम सोम ॥ २० ॥

सोमो धेनुꣳ सोमोऽअर्वन्तमाशुꣳ सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ॥ २१ ॥

त्वमिमाऽओषधीः सोम विश्वास्त्वमपोऽअजनयस्त्वं गाः ।
त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥ २२ ॥

देवेन नो मनसा देव सोम रायो भागꣳ सहसावन्नभि युध्य ।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्रचिकित्सा गविष्टौ ॥ २३ ॥

अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्याक्षः सविता देवऽआगाद्दधद्रत्ना दाशुषे वार्याणि ॥ २४ ॥

हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवीऽअन्तरीयते ।
अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति॥ २५ ॥

हिरण्यहस्तोऽअसुरः सुनीथः सुमृडीकः स्ववा यात्वर्वाङ् ।

अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥ २६ ॥

ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता ऽ अन्तरिक्षे ।
तेभिर्नो ऽ अद्य पथिभिः सुगेभी रक्षा च नो ऽ अधि च ब्रूहि देव ॥२७॥

उभा पिबतमश्विनोभा नः शर्म यच्छतम् । अविद्रियाभिरूतिभिः ॥२८॥

अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम् ।
अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ॥ २९ ॥

द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी ऽ उत द्यौः ॥३०॥

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ ३१ ॥

आ रात्रि पार्थिवꣳ रजः पितुरप्रायि धामभिः ।
दिवः सदाꣳसि बृहती वि तिष्ठस ऽ आ त्वेषं वर्तते तमः ॥३२॥

उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति । येन तोकं च तनयं च धामहे ॥३३॥

प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रꣳ हुवेम ॥ ३४ ॥

प्रातर्जितं भगमुग्रꣳ हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ ३५ ॥

भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः ।
भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥ ३६ ॥

उतेदानीं भगवन्तः स्यामोत प्रपित्व ऽ उत मध्ये ऽ अह्नाम् ।
उतोदिता मघवन्त्सूर्यस्य वयं देवानाꣳ सुमतौ स्याम ॥ ३७ ॥

भग ऽ एव भगवाँ २ऽ अस्तु देवास्तेन वयं भगवन्तः स्याम ।
तं त्वा भग सर्व ऽ इज्जोहवीति स नो भग पुर ऽ एता भवेह ॥ ३८ ॥

समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन ऽ आ वहन्तु ॥ ३९ ॥

अश्वा॑वतीर्गोम॑तीर्न ऽ उषासो॑ वीरव॑तीः सद॑मुच्छन्तु भद्राः ।
घृतं दुहा॑ना विश्वतः प्रपी॑ता यूयं पा॑त स्वस्तिभिः सदा॑ नः ॥ ४० ॥

पूषन्तव॑ व्रते व॒यं न रि॑ष्येम कदा॑ च॒न । स्तोतार॑स्त ऽ इह स्म॑सि ॥ ४१ ॥

पथस्प॑थः परि॑पतिं वच॒स्या कामे॑न कृतो ऽ अ॒भ्यानड॒र्कम् ।
स नो॑ रासच्छुरुध॑श्चन्द्राग्रा धियं॑-धियथ्ं सीषधाति प्र पूषा ॥ ४२ ॥

त्रीणि॑ पदा वि च॑क्रमे विष्णु॑र्गो॒पा ऽ अदा॑भ्यः । अ॒तो धर्मा॑णि धा॒रय॑न् ॥४३॥
तद्विप्रा॑सो विपन्यवो॑ जागृवाथ्ंसः समि॑न्धते । विष्णो॒र्यत्प॑रमं प॒दम् ॥ ४४ ॥

घृतव॑ती भुव॑नानामभिश्रियो॒र्वी पृथ्वी म॑धुदुघे॑ सुपेश॑सा ।
द्यावा॑पृथिवी वरु॑णस्य॒ धर्म॑णा विष्क॑भिते ऽ अज॒रे भूरि॑रेतसा ॥ ४५ ॥

ये नः॑ सपत्ना ऽ अप॒ ते भ॑वन्त्विन्द्राग्निभ्या॒मव॑ बाधामहे॒ तान् ।
वस॑वो रुद्रा ऽ आदि॒त्या ऽ उ॑परि॒स्पृशं॑ मो॒ग्रं चेत्ता॑रमधिरा॒जम॑क्रन् ॥ ४६ ॥

आ ना॑सत्या त्रिभि॑रेकाद॒शैरि॒ह दे॒वेभि॑र्यातं मधु॒पेय॑मश्विना ।
प्रायु॒स्तारि॑ष्टं नी रपा॑थ्ंसि मृक्षत॒थ्ं सेध॑तं॒ द्वेषो॒ भव॑तथ्ं सचा॒भुवा॑ ॥४७॥

ए॒ष व॒ स्तोमो॑ मरुत ऽ इयं गीर्मा॑न्दा॒र्यस्य॑ मा॒न्यस्य॑ का॒रोः ।
एषा या॑सीष्ट त॒न्वे व॒यां वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुम् ॥ ४८ ॥

स॒हस्तो॑माः स॒हच्छ॑न्दस ऽ आ॒वृतः॑ स॒हप्र॑मा ऽ ऋष॑यः स॒प्त दैव्याः॑ ।
पूर्वे॑षां पन्था॑मनु॒दृश्य॒ धीरा॑ ऽ अ॒न्वाले॑भिरे र॒थ्यो॒ न र॒श्मीन् ॥ ४९ ॥

आयु॒ष्यं॑ वर्च॒स्य॒थ्ं रा॒यस्पोष॒मौद्भि॑दम् ।
इ॒दथ्ं हिर॑ण्यं॒ वर्च॑स्व॒ज्जैत्राया॒वि॑शतादु॒ माम् ॥ ५० ॥

न तद्रक्षा॑थ्ंसि॒ न पि॑शा॒चास्त॑रन्ति दे॒वाना॒मोजः॑ प्रथम॒जथ्ं ह्येतत् ।
यो बि॒भर्ति॑ दाक्षाय॒णथ्ं हिर॑ण्यथ्ं स दे॒वेषु॑ कृणुते दी॒र्घमायु॑ः
स म॑नु॒ष्ये॑षु कृणुते दी॒र्घमायु॑ः ॥ ५१ ॥

यदाब॑ध्नन्दाक्षाय॒णा हिर॑ण्यथ्ं श॒तानी॑काय सुमन॒स्यमा॑नाः ।
तन्म॒ ऽ आ ब॑ध्नामि श॒तशा॑रदा॒यायु॑ष्माञ्ज॒रद॑ष्टि॒र्यथास॑म् ॥ ५२ ॥

उत नोऽहिर्बुध्न्यः शृणोत्वज ऽएकपात्पृथिवी समुद्रः ।
विश्वे देवा ऽऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता ऽअवन्तु ॥ ५३ ॥

इमा गिर ऽआदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो ऽअर्यमा भगो नस्तुविजातो वरुणो दक्षो ऽअꣳशः ॥ ५४ ॥

सप्त ऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् ।
सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो ऽअस्वप्नजौ सत्रसदौ च देवौ ॥५५॥

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उप प्र यन्तु मरुतः सुदानव ऽइन्द्र प्राशूर्भवा सचा ॥ ५६ ॥

प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो ऽअर्यमा देवा ऽओकाꣳसि चक्रिरे ॥ ५७ ॥

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥
य ऽइमा विश्वा विश्वकर्मा यो नः पितान्नपतेऽन्नस्य नो देहि ॥ ५८ ॥

इति चतुस्त्रिंशोऽध्यायः ।

अथ पञ्चत्रिंशोऽध्यायः ।

अपेतो यन्तु पणयोऽसुम्ना देवपीयवः । अस्य लोकः सुतावतः ।
द्युभिरहोभिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै ॥ १ ॥

सविता ते शरीरेभ्यः पृथिव्याँल्लोकमिच्छतु । तस्मै युज्यन्तामुस्त्रियाः ॥ २ ॥

वायुः पुनातु सविता पुनात्वग्नेर्भ्राजसा सूर्यस्य वर्चसा । वि मुच्यन्तामुस्त्रियाः॥३॥

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता । गोभाज ऽइत्किलासथ यत्सनवथ पूरुषम्॥४॥

सविता ते शरीराणि मातुरुपस्थ ऽआ वपतु । तस्मै पृथिवि शं भव ॥ ५ ॥

प्रजापतौ त्वा देवतायामुपोदके लोके नि दधाम्यसौ । अप नः शोशुचदघम् ॥ ६ ॥

परं मृत्यो ऽअनु परेहि पन्थां यस्ते ऽअन्य ऽइतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् ॥ ७ ॥

शं वातः शꣳ हि ते घृणिः शं ते भवन्त्विष्टकाः ।
शं ते भवन्त्वग्नयः पार्थिवासो मा त्वाभि शूशुचन् ॥ ८ ॥

कल्पन्तां ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः ।
अन्तरिक्षꣳ शिवं तुभ्यं कल्पन्तां ते दिशः सर्वाः ॥ ९ ॥

अश्मन्वती रीयते सꣳ रभध्वमुत्तिष्ठत प्र तरता सखायः ।
अत्रा जहीमोऽशिवा येऽअसञ्छिवान्वयमुत्तरेमाभि वाजान् ॥ १० ॥

अपाघमप किल्बिषमप कृत्यामपो रपः । अपामार्ग त्वमस्मदप दुःष्वप्न्यꣳ सुव ॥११॥

सुमित्रिया नऽआपऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ १२ ॥

अनड्वाहमन्वारभामहे सौरभेयꣳ स्वस्तये । स नऽइन्द्रऽइव देवेभ्यो वह्निः सन्तारणो भव १३

उद्वयं तमसस्परि स्वः पश्यन्तऽउत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥१४॥

इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरोऽअर्थमेतम् ।
शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन ॥ १५ ॥

अग्नऽआयूꣳषि पवसऽआ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥१६॥

आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि ।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमान्त्स्वाहा ॥ १७ ॥

परीमे गामनेषत पर्यग्निमहृषत । देवेष्वक्रत श्रवः कऽइमाँ२ऽआ दधर्षति ॥ १८ ॥

क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ १९ ॥

वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान्पराके ।
मेदसः कुल्याऽउप तान्त्स्रवन्तु सत्याऽएषामाशिषः सं नमन्ताꣳ स्वाहा ॥ २० ॥

स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः । अप नः शोशुचदघम् ॥२१

अस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः । असौ स्वर्गाय लोकाय स्वाहा ॥२२॥

इति पञ्चत्रिंशोऽध्यायः ।

अथ षट्त्रिंशोऽध्यायः ।

ऋचं वाचं प्र पद्ये मनो यजुः प्र पद्ये साम प्राणं प्र पद्ये चक्षुः श्रोत्रं प्र पद्ये ।
वागोजः सहौजो मयि प्राणापानौ ॥ १ ॥

यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु ।
शं नो भवतु भुवनस्य यस्पतिः ॥ २ ॥

भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ३ ॥

कया नश्चित्र ऽआ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ ४ ॥

कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥ ५ ॥

अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतिभिः ॥ ६ ॥

कया त्वं न ऽऊत्याभि प्र मन्दसे वृषन् । कया स्तोतृभ्य ऽआ भर ॥ ७ ॥

इन्द्रो विश्वस्य राजति । शं नो ऽअस्तु द्विपदे शं चतुष्पदे ॥ ८ ॥

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा । शं न ऽइन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥९

शं नो वातः पवताꣳ शं नस्तपतु सूर्यः । शं नः कनिक्रदद्देवः पर्जन्यो ऽअभि वर्षतु ॥१०

अहानि शं भवन्तु नः शꣳ रात्रीः प्रति धीयताम् ।
शं न ऽइन्द्राग्नी भवतामवोभिः शं न ऽइन्द्रावरुणा रातहव्या ।
शं न ऽइन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शं योः ॥ ११ ॥

शं नो देवीरभिष्टय ऽआपो भवन्तु पीतये । शं योरभि स्रवन्तु नः १२ ॥

स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥ १३ ॥

आपो हि ष्ठा मयोभुवस्ता न ऽऊर्जे दधातन । महे रणाय चक्षसे ॥ १४ ॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ १५ ॥

तस्मा ऽअरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥१६ ॥

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।
वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः
सा मा शान्तिरेधि ॥ १७ ॥

दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे ॥१८॥

दृते दृꣳह मा। ज्योक्ते सन्दृशि जीव्यासं ज्योक्ते सन्दृशि जीव्यासम् ॥ १९ ॥

नमस्ते हरसे शोचिषे नमस्ते ऽअस्त्वर्चिषे।
अन्याँस्ते ऽअस्मत्तपन्तु हेतयः पावको ऽअस्मभ्यꣳ शिवो भव ॥ २० ॥

नमस्ते ऽअस्तु विद्युते नमस्ते स्तनयित्नवे।
नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥ २१ ॥

यतो-यतः समीहसे ततो नो ऽअभयं कुरु। शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥२२॥

सुमित्रिया न ऽआप ऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ २३ ॥

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्र ब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥२४॥

इति षट्त्रिंशोऽध्यायः।

अथ सप्तत्रिंशोऽध्यायः।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। आ ददे नारिरसि ॥१॥

युञ्जते मन ऽउत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेक ऽइन्मही देवस्य सवितुः परिष्टुतिः ॥ २ ॥

देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ३ ॥

देव्यो वम्र्यो भूतस्य प्रथमजा मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ४ ॥

इयत्यग्र ऽआसीन्मखस्य तेऽद्य शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ५ ॥

इन्द्रस्यौजं स्थ मखस्यं वोऽद्य शिरों राध्यासं देवयजंने पृथिव्याः। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखायं त्वा मखस्यं त्वा शीर्ष्णे ॥ ६ ॥

प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृतां। अच्छां वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखायं त्वा मखस्यं त्वा शीर्ष्णे ॥ ७ ॥

मखस्य शिरोंऽसि। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखस्य शिरोंऽसि। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखस्य शिरोंऽसि। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखायं त्वा मखस्यं त्वा शीर्ष्णे ॥ ८ ॥

अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजंने पृथिव्याः। मखायं त्वा मखस्यं त्वा शीर्ष्णे। अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजंने पृथिव्याः। मखायं त्वा मखस्यं त्वा शीर्ष्णे। अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजंने पृथिव्याः। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखायं त्वा मखस्यं त्वा शीर्ष्णे ॥ ९ ॥

ऋजवें त्वा साधवें त्वा सुक्षित्यै त्वा। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखायं त्वा मखस्यं त्वा शीर्ष्णे। मखायं त्वा मखस्यं त्वा शीर्ष्णे ॥ १० ॥

यमायं त्वा मखायं त्वा सूर्यस्य त्वा तपंसे। देवस्त्वां सविता मध्वानक्तु पृथिव्याः सꣳस्पृशस्पाहि। अर्चिरंसि शोचिरंसि तपोंऽसि ॥ ११ ॥

अनांधृष्टा पुरस्तादग्नेराधिपत्य ऽआयुर्मे दाः पुत्रवंती दक्षिणत ऽइन्द्रस्याधिपत्ये प्रजां मे दाः। सुषदां पश्चाद्देवस्यं सवितुराधिपत्ये चक्षुर्मे दा ऽआश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः। विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्य ऽओजों मे दा विश्वांभ्यो मा नाष्ट्राभ्यस्पाहि मनोरश्वांसि ॥ १२ ॥

स्वाहां मरुद्भिः परिं श्रीयस्व दिवः सꣳस्पृशस्पाहि। मधु मधु मधुं ॥ १३ ॥

गर्भो देवानां पिता मतीनां पतिः प्रजानांम्।
सं देवो देवेनं सवित्रा गंत सꣳ सूर्येण रोचते ॥ १४ ॥

समग्निरग्निना गत सं दैवेन सवित्रा सꣳ सूर्येणारोरुचिष्ट ।
स्वाहा समग्निस्तपसा गत सं दैव्येन सवित्रा सꣳ सूर्येणारूरुचत ॥ १५ ॥

धर्ता दिवो वि भाति तपसस्पृथिव्यां धर्ता देवो देवानाममर्त्यस्तपोजाः ।
वाचमस्मे नि यच्छ देवायुवम् ॥ १६ ॥

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान ऽआ वरीवर्ति भुवनेष्वन्तः ॥ १७ ॥

विश्वासां भुवां पते विश्वस्य मनसस्पते विश्वस्य वचसस्पते सर्वस्य वचसस्पते ।
देवश्रुत्त्वं देव घर्म देवो देवान्पाह्यत्र प्रावीरनु वां देववीतये ।
मधु माध्वीभ्यां मधु माधूचीभ्याम् ॥ १८ ॥

हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा । ऊर्ध्वो ऽ अध्वरं दिवि देवेषु धेहि ॥१९ ॥

पिता नोऽसि पिता नो बोधि नमस्ते ऽअस्तु मा मा हिꣳसीः । त्वष्टृमन्तस्त्वा सपेम
पुत्रान्पशून्मयि धेहि प्रजामस्मासु धेह्यरिष्टाहꣳ सह पत्या भूयासम् ॥ २० ॥

अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ।
रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ॥ २१ ॥

इति सप्तत्रिंशोऽध्यायः ।

अथाष्टत्रिंशोऽध्यायः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आ ददेऽदित्यै रास्नासि ॥१

इड ऽ एह्यदित ऽ एहि सरस्वत्येहि । असावेह्यसावेह्यसावेहि ॥ २ ॥

अदित्यै रास्नासीन्द्राण्या ऽ उष्णीषः । पूषासि घर्माय दीष्व ॥ ३ ॥

अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व ।
स्वाहेन्द्रवत्स्वाहेन्द्रवत्स्वाहेन्द्रवत् ॥ ४ ॥

यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः ।
येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवेऽकः । उर्वन्तरिक्षमन्वेमि ॥ ५ ॥

गायत्रं छन्दोऽसि त्रैष्टुभं छन्दोऽसि द्यावापृथिवीभ्यां त्वा परि गृह्णाम्यन्तरिक्षेणोप यच्छामि।
इन्द्राश्विना मधुनः सारघस्य घर्मं पात वसवो यजत वाट् ।
स्वाहा सूर्यस्य रश्मये वृष्टिवनये ॥ ६ ॥

समुद्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा ।
अनाधृष्याय त्वा वाताय स्वाहाप्रतिधृष्याय त्वा वाताय स्वाहा ।
अवस्यवे त्वा वाताय स्वाहाशिमिदाय त्वा वाताय स्वाहा ॥ ७ ॥

इन्द्राय त्वा वसुमते रुद्रवते स्वाहेन्द्राय त्वादित्यवते स्वाहेन्द्राय त्वाभिमातिघ्ने स्वाहा।
सवित्रे त्व ऽ ऋभुमते विभुमते वाजवते स्वाहा बृहस्पतये त्वा विश्वदेव्यावते स्वाहा ॥८॥
यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥ ९ ॥

विश्वा ऽ आशा दक्षिणसद्विश्वान्देवानयाडिह ।
स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विना ॥ १० ॥

दिवि धा ऽ इमं यज्ञमिमं यज्ञं दिवि धाः । स्वाहाग्नये यज्ञियाय शं यजुर्भ्यः ॥ ११ ॥

अश्विना घर्मं पातꣳ हार्द्वानमहर्दिवाभिरूतिभिः ।
तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥ १२ ॥

अपातामश्विना घर्ममनु द्यावापृथिवी ऽ अमꣳसाताम् । इहैव रातयः सन्तु ॥ १३ ॥
इषे पिन्वस्वोर्जे पिन्वस्व ब्रह्मणे पिन्वस्व क्षत्राय पिन्वस्व द्यावापृथिवीभ्यां पिन्वस्व ।
धर्मासि सुधर्मामेन्यस्मे नृम्णानि धारय ब्रह्म धारय क्षत्रं धारय विशं धारय ॥ १४॥
स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः। स्वाहा पितृभ्य ऽ ऊर्ध्वबर्हिभ्यो
घर्मपावभ्यः स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा विश्वेभ्यो देवेभ्यः ॥ १५ ॥
स्वाहा रुद्राय रुद्रहूतये स्वाहा सं ज्योतिषा ज्योतिः । अहः केतुना जुषताꣳ
सुज्योतिर्ज्योतिषा स्वाहा। रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ।
मधु हुतमिन्द्रतमे ऽ अग्नावश्याम ते देव घर्म नमस्ते ऽ अस्तु मा मा हिꣳसीः ॥ १६॥

अभीमं महिमा दिवं विप्रो बभूव सप्रथाः ।
उत श्रवसा पृथिवीꣳ सꣳ सीदस्व महाँ २ऽ असि रोचस्व देववीतमः ।
वि धूममग्ने ऽ अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥ १७ ॥

या ते॑ घर्म दि॒व्या शुग्या गा॑य॒त्र्याᳪं᳭ ह॑वि॒र्धाने॑ ।
सा त॒ऽआ प्या॑यतां॒ निष्ट्या॑यतां॒ तस्यै॑ ते॒ स्वाहा॑ ।
या ते॑ घ॒र्मान्तरि॑क्षे॒ शुग्या त्रि॒ष्टुब्भ्याग्नी॑ध्रे ।
सा त॒ऽआ प्या॑यतां॒ निष्ट्या॑यतां॒ तस्यै॑ ते॒ स्वाहा॑ ।
या ते॑ घर्म पृथि॒व्याᳪं᳭ शुग्या जग॑त्याᳪं᳭ सद॒स्या ।
सा त॒ऽआ प्या॑यतां॒ निष्ट्या॑यतां॒ तस्यै॑ ते॒ स्वाहा॑ ॥ १८ ॥

क्ष॒त्रस्य॑ त्वा प॒रस्पा॑य॒ ब्रह्म॑णस्त॒न्वं॑ पाहि ।
वि॒शस्त्वा॒ धर्म॑णा व॒यमनु॑ क्रामाम सुवि॒ताय॒ नव्य॑से ॥ १९ ॥

चतु॑:स्रक्ति॒र्नाभि॑र्ऋ॒तस्य॑ स॒प्रथा॑: स नो॑ वि॒श्वायु॑: स॒प्रथा॑: स न॑: स॒र्वायु॑: स॒प्रथा॑: ।
अप॒ द्वेषो॒ऽअप॒ ह्वरो॒ऽन्यव्र॑तस्य सश्चिम ॥ २० ॥

घ॒र्मैतत्ते॒ पुरी॑षं॒ तेन॒ वर्ध॑स्व॒ चा च॑ प्यायस्व । व॒र्धि॒षी॒महि॑ च व॒यमा च॑ प्यासिषीमहि ॥२१

अचि॑क्रद॒द्वृषा॒ हरि॑र्म॒हान्मि॒त्रो न द॑र्श॒तः । सᳪं᳭ सूर्ये॑ण दिद्युतदुद॒धिर्नि॒धिः ॥२२॥

सु॒मि॒त्रि॒या न॒ऽआप॒ऽओष॑धयः सन्तु दु॒र्मि॒त्रि॒यास्तस्मै॑ सन्तु॒
यो॒ऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः ॥ २३ ॥

उ॒द्वयन्तम॑स॒स्परि॒ स्वः॒ पश्य॑न्त॒ऽउत्त॑रम् । दे॒वं दे॑व॒त्रा सूर्य॒मग॑न्म॒ ज्योति॑रुत्त॒मम् ॥२४॥

एधो॒ऽस्येधिषी॒महि॑ स॒मिद॑सि॒ तेजो॒ऽसि॒ तेजो॒ मयि॑ धेहि ॥ २५ ॥

याव॑ती॒ द्यावा॑पृथि॒वी याव॑च्च स॒प्त सिन्ध॑वो वितस्थि॒रे ।
ताव॑न्तमिन्द्र॒ ते॒ ग्रह॑मू॒र्जा गृ॑ह्णा॒म्यक्षि॑तं॒ मयि॑ गृह्णा॒म्यक्षि॑तम् ॥ २६ ॥

मयि॒ त्यदि॑न्द्रि॒यं बृ॒हन्मयि॒ दक्षो॒ मयि॒ क्रतु॑: ।
घ॒र्मस्त्रि॒शुग्वि रा॑जति वि॒राजा॒ ज्योति॑षा स॒ह ब्रह्म॑णा॒ तेज॑सा स॒ह ॥ २७ ॥

पय॑सो॒ रेत॒ऽआभृ॑तं॒ तस्य॒ दोह॑मशीम॒ह्युत्त॑रामुत्त॒राᳪं᳭ समा॑म् ।
त्विष॑: सं॒वृक् क्रत्वे॒ दक्ष॑स्य ते सुषु॒म्णस्य॑ ते सुषुम्णाग्निहु॒तः ।
इन्द्र॑पीतस्य प्र॒जाप॑तिभक्षितस्य॒ मधु॑मत॒ऽउप॑हूत॒ऽउप॑हूतस्य भक्षयामि ॥२८॥

इत्यष्टात्रिंशोऽध्यायः ।

अथैकोनचत्वारिंशोऽध्यायः ।

स्वाहा प्राणेभ्यः साधिपतिकेभ्यः । पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा वायवे स्वाहा । दिवे स्वाहा सूर्याय स्वाहा ॥ १ ॥

दिग्भ्यः स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहा वरुणाय स्वाहा । नाभ्यै स्वाहा पूताय स्वाहा ॥ २ ॥

वाचे स्वाहा प्राणाय स्वाहा प्राणाय स्वाहा । चक्षुषे स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा श्रोत्राय स्वाहा ॥ ३ ॥

मनसः काममाकूतिं वाचः सत्यमशीय ।
पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥ ४ ॥

प्रजापतिः सम्भ्रियमाणः सम्राट् सम्भृतो वैश्वदेवः सꣳसन्नो घर्मः प्रवृक्तस्तेज उद्यत ऽआश्विनः पयस्यानीयमाने पौष्णो विष्यन्दमाने मारुतः क्लथन् । मैत्रः शरसि सन्ताय्यमाने वायव्यो ह्रियमाण ऽआग्नेयो हूयमानो वाग्घुतः ॥ ५ ॥

सविता प्रथमेऽहन्नग्निर्द्वितीये वायुस्तृतीयऽआदित्यश्चतुर्थे चन्द्रमाः पञ्चम ऽऋतुः षष्ठे मरुतः सप्तमे बृहस्पतिरष्टमे । मित्रो नवमे वरुणो दशम ऽइन्द्र ऽएकादशे विश्वे देवा द्वादशे ॥६ ॥

उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च । सासह्वाँश्चाभियुग्वा च विक्षिपः स्वाहा ॥ ७ ॥

अग्निꣳ हृदयेनाशनिꣳ हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना । शर्वं मतस्नाभ्यामीशानं मन्युना महादेवमन्तःपर्शव्येनोग्रं देवं वनिष्ठुना वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥८॥

उग्रँल्लोहितेन मित्रꣳ सौव्रत्येन रुद्रं दौर्व्रत्येनेन्द्रं प्रक्रीडेन मरुतो बलेन साध्यान्प्रमुदा । भवस्य कण्ठ्यꣳ रुद्रस्यान्तःपार्श्व्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ॥९॥

लोमभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय स्वाहा लोहिताय स्वाहा मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा । माꣳसेभ्यः स्वाहा माꣳसेभ्यः स्वाहा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहास्थभ्यः स्वाहास्थभ्यः स्वाहा मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा । रेतसे स्वाहा पायवे स्वाहा ॥ १० ॥

आयासाय स्वाहा प्रायासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा । शुचे स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय स्वाहा ॥ ११ ॥

तपसे स्वाहा तप्यते स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा घर्माय स्वाहा।
निष्कृत्यै स्वाहा प्रायश्चित्यै स्वाहा भेषजाय स्वाहा ॥ १२ ॥

यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा।
ब्रह्मणे स्वाहा ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा
द्यावापृथिवीभ्याᳬं स्वाहा ॥ १३ ॥

इत्येकोनचत्वारिंशोऽध्यायः।

अथ चत्वारिंशोऽध्यायः।

ईशा वास्यमिदᳬं सर्वं यत्किं च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥ १ ॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतᳬं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २ ॥

असुर्या नाम ते लोकाऽअन्धेन तमसावृताः।
ताँस्ते प्रेत्यापि गच्छन्ति ये के चात्महनो जनाः ॥ ३ ॥

अनेजदेकं मनसो जवीयो नैनद्देवाऽआप्नुवन्पूर्वमर्शत्।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥

तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥

यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न वि चिकित्सति ॥ ६ ॥

यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
तत्र को मोहः कः शोकऽएकत्वमनुपश्यतः ॥ ७ ॥

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरᳬं शुद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥ ८ ॥

अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते ।
ततो भूयऽइव ते तमो यऽउ सम्भूत्याᳬ रताः ॥ ९ ॥

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १० ॥

सम्भूतिं च विनाशं च यस्तद्वेदोभयᳬ सह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ॥ ११ ॥

अन्धन्तमः प्र विशन्ति येऽविद्यामुपासते ।
ततो भूयऽइव ते तमो यऽउ विद्यायाᳬ रताः ॥ १२ ॥

अन्यदेवाहुर्विद्याया ऽअन्यदाहुरविद्यायाः ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥

विद्यां चाविद्यां च यस्तद्वेदोभयᳬ सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥ १४ ॥

वायुरनिलममृतमथेदं भस्मान्तᳬ शरीरम् ।
ओ ३ म् क्रतो स्मर । क्लिबे स्मर । कृतᳬ स्मर ॥ १५ ॥

अग्ने नय सुपथा रायेऽअस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम ॥ १६ ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
योऽसावादित्ये पुरुषः सोऽसावहम् ।
ओ३म् खं ब्रह्म ॥ १७ ॥ [मंत्रसंख्या १९७५]

इति चत्वारिंशोऽध्यायः ।

इत्युत्तरविंशतिः समाप्ता ।

इति वाजसनेयि-माध्यन्दिन-शुक्ल यजुर्वेदसंहिता समाप्ता ।

अथ काण्वशाखायां पाठविशेषाः ।

वाजसनेयिसंहिता **प्रथम-दशकः ।** काण्वसंहिता

मन्त्राङ्काः । प्रथमोऽध्यायः । मन्त्राङ्काः ।

(१) अनुवाकांकाः ।

१--२ इषे० ०पाहि वसोः पवित्रमसि॥ १-३ ॥

(२)

२--४ द्यौरसि० ॥ विश्वधाः परमेण० ॥१॥ ०नातनक्मिं विष्णो हव्यꣳ रक्षस्व॥१-४॥

(३)

५--७ अग्ने० ०मन्वैमि॥ १-३ ॥

८-११ धूरसि०॥ धूर्व तं यं०॥ ०मसि सस्नितमँ वह्नितमं पप्रितमं०॥ ०विरुब्धेषम्॥४-७॥

११ दृꣳहन्तां० ०हव्यꣳ रक्षस्व॥ ८ ॥

(४)

१२ पवित्रे० ०यज्ञं नयत सुधातुँ यज्ञपतिं देवायुवम्॥ १-२ ॥

१३ युष्मा० ०यद्वोऽशुद्धः परा जघानैतद्वस्तच्छुन्धामि॥ ३-४ ॥

(५)

१४-१५ शर्मा० ॥ ३ ॥ बृहन्ग्रावासि० हव्यꣳ शमीष्व० हि॥ १-४ ॥

१६ कुक्कुटो० ०आवद । वयꣳ संघाते-संघाते जेष्म॥ ५ ॥

०प्रतिपूता अरातयः ॥६॥ ०सविता प्रति गृह्णातु हिरण्यपाणिरच्छिद्रेण पाणिना॥ ७ ॥

(६)

१७-१८ धृष्टि० ॥ ०उपदधामि द्विषतो वधाय ॥ २-४ ॥ चित्त० ०ध्वम्॥ १-४ ॥

(७)

१९ शर्मा० ॥ दिवःस्कम्भन्यसि० ०वेत्तु॥ १-२ ॥

२० धान्य० ०देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिम् ॥ धिनुहि माँ यज्ञन्यम्॥ ३ ॥

प्राणाय० ०सविता प्रति गृह्णातु हिरण्यपाणिरच्छि०॥ ०पयोऽसि॥ ४ ॥

[अ०२।२१] वेदोऽसि वेद येन त्वं देव वेद देवेभ्यो वेदोऽभवः ॥तेन मह्यं वेदो भव॥५॥

(८)

२१-२२ देवस्य० ॥ ०जगतीभिः सं मधुमतीः० ॥ ०सँ यौमि॥ १ ॥

२२-२३ इदमग्ने० ॥०हिꣳसीदन्तरितꣳ रक्षोऽन्तरिता अरातयः ॥० ०त्वा॥ २-४ ॥

(९)

२४--२५ देवस्य० ॥ १ ॥ पृथिव्यै वर्मासि पृथिवि देवयज० ०मौक्।। १–३।।

२६--२७ अपाररुँ वध्यासं पृथिव्यै देवयजनात् । व्रजं० ०पयस्वती च।। ४–५ ।।

२८ पुरा० ०तं धीरासो अनुदिश्य यजन्ते । द्विषतो वधोऽसि ॥ ६ ॥

(१०)

२९ प्रत्युष्ट२० ०संमार्ग्मि।। १ ।।

३० अदित्यै रास्नासीन्द्राण्यै संनहनम् । विष्णोर्वेष्पो० ०पश्यामि।। २ ।।

३० अग्नेर्जिह्वासि सुभूर्देवेभ्यः । धाम्ने-धाम्ने भव यजुषे यजुषे ।

३१ सवितुस्त्वा० ०देवयजनम्।। ३–४ ।।

० यस्ते प्राणः पशुषु प्रविष्टो देवानाँ विष्ठामनु यो वितस्थे ।

आत्मन्धान्त्सोम घृतवान्हि भूत्वाग्निं गच्छ स्वर्यजमानाय विन्द ॥ ५ ॥

[दशानुवाकेषु पञ्चाशत् ।।५०।।]इति प्रथमोऽध्यायः । ।।५०।।

अथ द्वितीयोऽध्यायः ।

(१)

१--३ कृष्णो० देवेभ्यः।। २ ।। भूपतये स्वाहा० ०स्यारिष्यै।। १--३।।

३--५ यजमानस्य परिधिरस्यग्निरिळ ईळितः ।३ ०सदन्तु।। ४–७ ।।

६ घृताच्यसि जुहूर्नाम० ०प्रिये सदसि सीद ।।३ ०यज्ञन्यम्।। ८–९ ।।

(२)

७--८ अग्ने० ।। १ ।। अस्कन्नमद्याज्यं देवेभ्यः सम्भ्रि० ०आस्थात्।।१-३।।

९ अग्ने० ।। अवतां त्वा द्यावा० ०त्वं द्यावापृथिवी।।४।। ०ज्योतिः।।४-५।।

३१ अत्र पितरो० ०यथाभागमावृषायिषत।। ६ ।।

१०,११, उपहूता० भ्रात्स्वाहा ।। ७ ।। उपहूतो द्यौ० स्वाहा।। ७–८ ।।

१०,१४ मयीद० नः सन्त्वाशिषः ।। अग्ने वाजजिद्वा० सम्मार्ज्मि।। ९ ।।

(३)

० देवं सवितरेतं त्वा वृणते बृहस्पतिं ब्रह्माणम् । तदहं मनसे प्रब्रवीमि ।। १ ।।

,, मनो गायत्र्यै गायत्री त्रिष्टुभे त्रिष्टुब्जगत्यै जगत्यनुष्टुभे ।।

अनुष्टुप्प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यः ।। २ ।।

० बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणाम् ॥
भूर्भुवःस्वर्निरस्तः पाप्मेदमहं बृहस्पतेः सदसि सीदामि ॥ ३ ॥
,, मित्रस्य त्वा चक्षुषा प्रतीक्षे ॥ देवस्य त्वा/सवितुः प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्याम् । प्रतिगृह्णामि पृथिव्यास्त्वा नाभौ सादयाम्यदित्या
उपस्थे । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ ४ ॥
,, आददेऽग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मुखेन॥या अप्स्वन्तर्देवतास्ता इद१ँ शमयन्तु॥५॥
,, स्वाहाकृतं जठरमिन्द्रस्य गच्छ ॥ घसिना मे मा संपृक्था ऊर्ध्वं मे नाभेः सीद॥६॥
,, इन्द्रस्य त्वा जठरे सादयामि ॥ प्रजापतेर्भागोऽस्यूर्जस्वान्पयस्वान् ॥ ७ ॥
,, प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाहि ॥
ऊर्गस्यूर्जं मयि धेह्यक्षितिरसि मा मे क्षेष्ठा अमुत्रामुष्मिल्लोकऽइह च ॥ ८ ॥
१४,१२,१३ एषा ते० महि॥९॥एतत्ते० मामव॥१०॥मनो ज्योति० प्रतिष्ठ॥९-११॥

(४)

१५-१९ अग्नीषोम०॥१॥ व्यन्तु वयोरिप्तो रिहाणा मरुतां पृषतीं गच्छ ॥ ०॥ ३ ॥
,, चक्षुष्पा असि ०॥४॥ ०परिधयश्च देवाः ! इमाँ० ०मा धत्तम्॥४-६॥

(५)

२० अग्नेऽदब्धा० ॥ १ ॥ अग्नये सं० ०यशोभगिन्यै स्वाहा ॥
० उलूखले मुसले यश्च शूर्पेऽआशिश्लेष दृषदि यत्कपाले ॥ १-२ ॥
,, उत्प्रुषो विप्रुषः संजुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहा।
आप्यायतां ध्रुवा हविषा घृतेन यज्ञं-यज्ञं प्रति देवयद्भ्यः ।
सूर्याया ऊधो अदित्या उपस्थ उरुधारा पृथिवी यज्ञे अस्मिन् ॥ ३ ॥
२१-२३ देवा गातुविदो गातुमित्वा गा० ०भागोऽसि॥ ४--६ ॥
० वेषोऽस्युपवेषो द्विषतो ग्रीवा उप वेविङ्धि । वेशाँऽअग्ने सुभग धारयेह ॥७॥
,, ऋद्धाः कर्मण्या अनपायिनो यथासन् ।
जुहोमि त्वा सुभग सौभगाय पुरूतमं पुरुहूत श्रवस्यन् ॥ ८ ॥

(६)

२४ सँ वर्चसा० ०विलिष्टम्॥ १ ॥
० यज्ञ शं च त उप च। शिवे मे संतिष्ठस्वारिष्टे मे सन्तिष्ठस्व स्विष्टे मे सन्तिष्ठस्व॥२॥

२५–२६ दिवि० ०मन्वावर्ते॥ ३–५ ॥

(२७) अग्ने गृहपते सुगृहपतिरहं त्वया गृहपत्या भूयासम् ।

सुगृहपतिस्त्वं मया गृहपत्या भूयाः ॥ ६ ॥

,, अस्थूरि णो गार्हपत्यानि सन्तु शतꣳ हिमाः ॥

तिग्मेन नस्तेजसा सꣳशिशाधि सूर्यस्यावृतमन्वावर्ते ॥ ७ ॥

[अ० ५।३८] उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि ।

घृतं घृतयोने पिब प्र-प्र यज्ञपतिं तिर ॥ ८ ॥

० ततोऽसि तन्तुरस्यनु मा तनुहि ।

अस्मिन्यज्ञेऽस्याः साधु कृत्यायामस्मिन्नन्नेऽस्मिल्लोके ॥ ९ ॥

,, इदं मे कर्मेदं वीर्यं पुत्रोऽनुसंतनोतु ।

२८ अग्ने० ०एवास्मि स एवास्मि॥ १० ॥

(७)

२९–३१ अग्नये० ०वृषायिषत॥ १–३ ॥

(३२) नमो वः पितरः शुष्माय नमो वः पितरस्तपसे ॥ नमो वः पितरो यज्जीवं तस्मै नमो वः पितरो रसाय॥ नमो वः पितरो घोराय मन्यवे स्वधायै वः पितरो नमः । एतद्वः पितरो वासो गृहान्नः पितरो दत्त ॥ ४ ॥

० उदायुषा स्वायुषोत्पर्जन्यस्य धामभिः । उदस्थाममृताँऽ अनु ॥ ५ ॥

३३–३४ आधत्त० ०पितॄन्॥ ६–७ ॥

[सप्तानुवाकेषु षष्टिः ॥६०॥] इति द्वितीयोऽध्यायः॥[११०]

अथ तृतीयोऽध्यायः ।

(१)

१–८ समिधा० ०भूम्ना भूमिरिव वरिम्णा० ॥ ५ ॥ ०द्युभिः॥ १–८ ॥

(२)

० अग्निर्ज्योतिषं त्वा वायुमतीं प्राणवतीम् ॥ स्वर्ग्यꣳ स्वर्गायोपदधामि भास्वतीम् ॥

९ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥ १ ॥

० सूर्यज्योतिषं त्वा वायुमतीं प्राणवंतीम्। स्वर्ग्यां॒ स्वर्गायोपदधामि भास्वतीम् ॥
९ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ॥ २ ॥
॥ १० ॥ सजू० ०वेतु स्वाहा॥ ३-४ ॥
० इह पुष्टिं पुष्टिपतिर्दधात्विह प्रजाꣳ रमयतु प्रजापतिः ।
,, अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहा॥ अग्नयेऽन्नादायान्नपतये स्वाहा ॥५॥
,, अनमित्रं मेऽअधरागनमित्रमुदक्कधि॥इन्द्रानमित्रं पश्चान्मेऽनमित्रं पुरस्कधि॥६॥
,, इन्द्रः पश्चादिन्द्रः पुरस्तादिन्द्रोऽअसाँ२ऽअभि पातु विश्वतः ॥
इन्द्रो जिघांꣳसतां मनांꣳसि विषूचीना व्यस्यतात् ॥ ७ ॥
,, समिदसि समिद्धो मे अग्ने दीदिहि॥ समेद्धा ते अग्ने दीद्यासम् ॥ ८ ॥

(३)

११-१३ उपप्रयन्तो० ० दातारा ऽइषाꣳ ०हुवे माम्॥ १-३ ॥
१४-१८ अयं ते० ०अदाभ्यम्॥ ४-९ ॥
१८-२० चित्रा० ०महो वो भक्षीय॥ १०-११ ॥
२०-२१ उर्ज स्थो० ०पोष॒ वो भक्षीय ।
रेवती रमध्वमस्मिन्योना ऽअस्मिन्गोष्ठे ऽस्मिन्क्षयेऽस्मिँल्लोके॥ १२ ॥
२१-२२ इहैव स्तेतो मापगात ॥ ०पत्येन॥ १३ ॥
२२-२६ उप त्वा० ०समस्मात्॥ १४-१८ ॥
२७ इळऽएह्यदितऽएहि काम्य एहि । मयि वः कामधरणं भूयात्॥ १९ ॥
२८-३५ सोमान॒० ०प्रचोदयात्॥ २०-२७ ॥
३६ परि ते दूळभो रथोऽस्माँ२ऽअश्नो० । समिद्धो मा समर्धय प्रजया च धनेन च ॥२८॥

(४)

३७-३८ भूर्भुव० ०जाः प्रजया भूयासम् ॥ सु० ॥१॥ ०पशून्मे पाहि ।
आगन्म० ०वित्तमम्॥ १-२ ॥
३८-३९ अग्ने सम्राळभि ०स्व। ०गार्हपत्यः प्रजावान्वसुवित्तमः॥ ३ ॥
३९,४१ अग्ने गृह० ०स्व । गृहा० एमसि ॥ ४ ॥ ऊर्जं० ०बहुः॥ ४-५ ॥
४२-४३ गृहानु ०नतः । ०जावयः ॥ ६ ॥ अथो० ०शँयोः॥ ६-७ ॥

(५)

